## S-III/6/1224B/22

पञ्चमसत्रार्द्धम्

षष्ठपत्रम्

साहित्यम्

समयः घण्टात्रयम् | पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. शिशुपालवधे कीदृशं मङ्गलम्? पद्येऽस्मिन् कः अलङ्कारः?

2. अनुरुसारथिः कः? पदस्यास्य विग्रहवाक्यं लिखत।

**अथवा**

जनैः किमर्थम् आकुलम् ईक्षितम्?

3. त्विषां चयः – अस्यार्थः कः?

4. नारदस्य जटाः कीदृशाः?

**अथवा**

एणाजिनम् – पदस्यार्थः कः? कस्य वर्णने पदम् इदमागतम्?

5. निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्म कस्य अस्ति?

6. अच्युतः कस्मात्, किमर्थम् उदतिष्ठत्?

7. फाणिनः किमर्थं कष्टमन्वभूवन्?

**अथवा**

अर्घ्यशब्दस्यार्थः कः? व्युत्पत्तिं च लिखत।

8. नारदः कस्य अभिरामताम् अचूचुरत्?

9. महानुभावाः कीदृशाः?

10. 'तापिच्छम्' शब्दस्य व्युत्पत्तिः कथम्?

**अथवा**

शिशुपालवधमहाकाव्यस्य मल्लिनाथकृता टीका का?

11. स पुण्डरीकाक्ष इति स्फुटोऽभवत् – सन्दर्भं वर्णयत।

12. कृतः प्रजाक्षेपकृता. . . . . .पद्यस्य भावार्थः कः?

13. उरोविदारं प्रतिचस्करे नखैः. . . . .सन्दर्भं वर्णयतु।

14. विलोकनेनैव. . . . . .पद्यं पूर्णं कृत्वा श्रेयसि केन तृप्यते – वाक्यस्य अस्यार्थं लिखत।

**अथवा**

अहस्करः किमर्थं भीतोऽभवत्?

15. वैनायकं विषाणां नाम किम्? किमर्थं तत्र प्ररोहति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. गतं तिरश्चीनम् – पद्यं अन्वयार्थसहितं व्याख्यात।

17. स तप्तकार्तस्वरभास्वराम्बरः. . . . . .इत्यादि पद्यं प्रपूर्य पद्यस्य वैशिष्ट्यं लिखत।

**अथवा**

श्रीकृष्णोक्तं सत्यसङ्गमहिमानं, नारदस्य तेजस्वितां च वर्णयत।

18. श्रेयसि केन तृप्यते – वाक्यमिदं केनोक्तम्? ससन्दर्भं वर्णयत।

**अथवा**

सांख्यानुसारं भगवन्तं कविः कथं वर्णितवान्? विशदयतु।

19. हिरण्यकशिपोः वधं कविः कथं वर्णयति? विशदयतु।

**अथवा**

इन्द्रस्य दुरवस्थां कविः कथं वर्णितवान्?

20. ऋतवः रावणमाराधयन्ति इति वर्णयतु।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. नारदं प्रति श्रीकृष्णः कथं आतिथ्यम् अकरोत्? इति निबन्धं लिखत।

**अथवा**

श्रीकृष्णं प्रति नारदेन बोधितांशाः के? इति निबन्धात्मकम् उत्तरं लिखत।